॥ নিরৱাণমন্জরি ॥

অহং নামরো নৈৱ মরেত্যা ন দৈত্যো
ন গন্ধরৱযক্ষঃ পিশাচপ্রভেদঃ .
পুমান্নৈৱ ন স্ত্রী তথা নৈৱ ষণ্ডঃ
প্রকৃষ্টঃ প্রকাশস্ৱরূপঃ শিৱোহম্ .. ১..
অহং নৈৱ বালো যুৱা নৈৱ ৱৃদ্ধো
ন ৱরণী ন চ ব্রহমচারী গৃহস্থঃ .
ৱনস্থোপি নাহং ন সংন্যস্তধরমা
জগজ্জন্মনাশৈকহেতুঃ শিৱোহম্ .. ৩..
অহং নৈৱ মেযস্তিরোভূতমাযা
তথৈৱেক্ষিতুং মাং পৃথঙনাস্ত্যুপাযঃ .
সমাশ্লিষ্টকাযত্রযোপ্যদ্ৱিতীযঃ
সদাতীন্দ্রিযঃ সরৱরূপঃ শিৱোহম্ .. ৩..
অহং নৈৱ মন্তা ন গন্তা ন ৱক্তা
ন করতা ন ভোক্তা ন মুক্তাশ্রমস্থঃ .
যথাহং মনোৱৃত্তিভেদস্ৱরূপ-
স্তথা সরৱৱৃত্তিপ্রদীপঃ শিৱোহম্ .. ৪..
ন মে লোকযাত্রাপ্রৱাহপ্রৱৃত্তি-
রন মে বন্ধবুদ্ধ্যা দুরীহানিৱৃত্তিঃ .
প্রৱৃত্তিরিনৱৃত্ত্যাস্য চিত্তস্য ৱৃত্তি-
র্যতস্তন্ৱহং তত্স্ৱরূপঃ শিৱোহম্ .. ৫..
নিদানং যদজ্ঞানকার্যস্য কার্যং
ৱিনা যস্য সত্তৱং স্ৱতো নৈৱ ভাতি .
যদাদ্যন্তমধ্যান্তরালান্তরাল-
প্রকাশাত্মকং স্যাত্তদেৱাহমস্মি .. ৬..
যতোহং ন বুদ্ধিরন মে কার্যসিদ্ধি-

ৰ্যতো নাহমঙ্গং ন মে লিঙ্গভঙ্গম্ .
হৃদাকাশৰরতী গতাঙ্গত্রযারিতঃ
সদা সচ্চিদানন্দমূরিতঃ শিৰোহম্ .. ৭..
যদাসীদ্বিলাসাদ্বিকারং জগদ্য-
দ্বিকরাশ্রযং নাদ্বিতীযত্ৰতঃ স্যাৎ .
মনোবুদ্ধিচিত্তাহমাকারবৃত্তি-
প্রবৃত্তির্যতঃ স্যাত্তদেৰাহমস্মি .. ৮..
যদন্তরবহিরৰযাপকং নিত্যশুদ্ধং
যদেকং সদা সচ্চিদানন্দকন্দম্ .
যতঃ স্থূলসূক্ষ্মপ্রপঞ্চস্য ভানং
যতস্তৎপ্রসূতিস্তদেৰাহমস্মি .. ৯..
যদরেকন্দুৰিদ্যুৎপ্রভাজালমালা-
ৰিলাসাস্পদং যৎস্ৰভেদাদিশূন্যম্ .
সমস্তং জগদ্যস্য পাদাত্মকং স্যা-
দ্যতঃ শক্তিভানং তদেৰাহমস্মি .. ১০..
যতঃ কালমৃত্যুরিবভেতি প্রকামং
যতশ্চিত্তবুদ্ধীন্দ্রিযাণাং ৰিলাসঃ .
হরিব্রহমরুদ্রেন্দ্রচন্দ্রাদিনাম-
প্রকাশো যতঃ স্যাত্তদেৰাহমস্মি .. ১১..
যদাকাশৰৎসরৰগং শান্তরূপং
পরং জ্যোতিরাকারশূন্যং ৰরেণ্যম্ .
যদাদ্যন্তশূন্যং পরং শঙকরাখ্যং
যদন্তরিৰভাৰযং তদেৰাহমস্মি .. ১২..
ইতি শ্রীমৎপরমহংসপরিৰরাজকাচার্যস্য
শ্রীগোৰিন্দভগৰৎপূজ্যপাদশিষ্যস্য
শ্রীমচ্ছঙকরভগৰৎপাদ কৃতৌ

নিরৱাণমঞ্জরী সংপূরণা ..

Encoded by Sunder Hattangadi (sunderh@hotmail.com)

Please send corrections to sanskrit@cheerful.com